सं० १३६७

श्रिघ

सं० १३६७

नं १९६ 6
नं॰ २१९

त्रिपुरसुन्दरीध्यानम्

5827
8

ॐनमस्त्रिपुरसुन्दर्यै श्रीदेव्युवाच ॐदेवदेवमहादेवसच्चिदानन्दविग्र
ह पञ्चकृत्यपरेशानपरमानंददायक १ श्रीराजराजराजेशीश्रीम
त्त्रिपुरसुन्दरी तस्याध्यानंसमाचक्ष्वयदितेकरुणामयि २ श्रीईश्वर
उवाच लक्षवारसहस्राणिवारितापिपुनःपुनः स्त्रीस्वभावान्महा
देविपुनस्त्वंपरिपृच्छसि ३ इतःपूर्वंमयानोक्तंगोप्याद्गोप्यतरंशिवे
येनाहमपिपुत्रैश्चदेवासुरजयीसदा ४ निगमागमकोटीनांसारा
त्सारतरंशिवे श्रीराजराजराजेशीध्यानंसर्वोत्तमोत्तमम् ५ तवस्ने
हात्प्रवक्ष्यामिभोगमोक्षप्रदंनृणां ज्वररोगादिमृत्युघ्नंसर्वसौभा
ग्यवर्धनम् ६ भूतप्रेतपिशाचादिकृत्यानांशमनंशुभं यज्ज्ञाना
ज्जननीगर्भेपुनर्नजायतेनरः ७ ॐअनेककोटिब्रह्माण्डको

टीनां बहिरूर्ध्वतः सहस्रकोटिविस्तीर्णे सुधासिंधोस्तु मध्य
मे ७ रत्नद्वीपे जगद्द्वीपे शतकोटिप्रविस्तरे पञ्चविंशतितत्वात्म
पञ्चविंशतिपद्मकैः ८ नवरत्नमयैस्तम्भहाटकाकलितैः शुभैः
अनेककोटिविततैर्मणिकुट्टिममण्डितैः १० जातीचंपकपुन्नागके
तकीबकुलादिभिः बिल्वैश्च सहकारैश्च कल्पकैश्च कदम्बकैः ११
सर्वर्तुकुसुमापूर्णैर्वाञ्छितार्थफलप्रदैः वसन्तमन्मथानेक
रचितैः पक्षिसंकुलैः १२ नदीनदसहस्रैश्च सुधाधिकरसोत्तमैः
स्वर्नदीशतसाहस्राकुलोर्घैः कल्पपादपैः १३ स्वर्णसारसहंसाली
लसत्सौवर्णपङ्कजैः अन्यैश्च विविधैः पक्षिलक्षैः पूर्णैः सुलक्षणैः १४
शतयोजनसत्तुङ्गैर्गोपुराट्टालमण्डपैः रविकोटिसमप्रख्यैर्भूषणैर्म

णितोरणैः १५ त्रिंशल्लक्षयोजनायाममहापद्मवनावृतैः सहस्रयो
जनायामचिन्तामणिगृहोत्तमे १६ नवशक्तिलसद्योगपीठतत्वमयेशुभे
सहस्रकोटिविस्तारेश्रीचक्रान्तस्त्रिकोणके १७ चतुष्पीठान्तरेबिन्दौच
न्द्रसूर्याग्निकोटिभिः पञ्चब्रह्मात्मकेमंचेसर्वतत्वमयेम्बुजे १८ महा
मायाजवनिकांसहितेशुभमहत्तरे सप्ततानवषट्कोणचतुराननगर्भि
ते १९ चतुष्पीठंततःषट्त्रिंशत्तत्वोपरिहंसमालिके सर्वविद्यासनेसर्वतेजो
मयशुभान्तरे २० कोटिकंदर्पलावण्यशिववामाङ्गवासिनी एककालो
दितानेकचंद्रकोट्यर्ककोटिभां प्रभापाटलितानेककोटिब्रह्माण्डमण्ड
लां जपाकुसुमसंकाशामजपामजपात्मिकां २२ कुंकुमोदकसंकाशां
दाडिमीकुसुमारुणां बालार्ककोटिभांप्रसन्नांबालेन्दुमकुटांपरां २३

पाशाङ्कुशेक्षुकोदण्डपंचबाणलसत्करां अचंचलतडित्कोटिप्रभापिञ्जल
वाससं २४ समाहृतस्तनोरुजघनस्तनमण्डलां कोटीरकोटिघटितसुधाकर
सुधाप्लुतां २५ फलमूतिलकीभूतलोचनां कामलोचनां कटाक्षसरणीनिर्य
त्करुणापूर्णवीक्षणां २९ सूर्येन्दुमण्डलाकारमणिताटङ्कमण्डितां मुक्ताकारस
माकारनासाभरणभूषितां ३० दाडिमीबीजसन्दोहसंदेहद्विरदावलीं वीणानवद्यु
णादायिनिजवाणिगणोदयां ३१ कर्पूरवीटिकागंधसुगंधितदिगंतरां मणिदर्प
णदर्पघ्नकपोलफलकप्रभाम् ३२ प्रसन्नवदनांभोजांसमन्दहसितेक्षणां म
णिमंगलसूत्रेणविलसत्कम्बुकन्धरां ३३ श्रितकल्पलतीभूतभुजवल्लिचतु
ष्टयां रत्नांगुलीयनिवहलसदङ्गुलिपल्लवां ३४ तारहारस्फुरैर्भास्वत्स्तनहाट
कभूषितां कुचभारनमन्मध्यांत्रिवलीललितोदरां ३५ कम्बुकण्ठीसुनासा
ग्रां बिम्बोष्ठीमृदुपाननां सुवृत्तजंघोरुकाण्डां गूढगुल्फपदांबुजां शिञ्जानमणि

३ मंजीरमंजुपादाब्जमञ्जुलां रत्नग्रैवेयवलयमुकुटांगदकंकणां ३७ अ
3 नर्घ्यरत्नखचितरशनाजघनस्थलां सर्वशृंगारवेशाढ्यां सर्वाभरणभूषि
तां ३८ चंदनागुरुकस्तूरीमृगनाभिसुगंधिनीं कारणेशशिरोरत्ननिर्घृष्टच
रणांबुजाम् ३९ पंचप्रेतासनासीनां पंचब्रह्मस्वरूपिणीं सृष्टिस्थित्युपसंहारवि
धानानुग्रहोद्यतां ४० अष्टात्रिंशत्कलारूपामष्टवाग्देवतावृतां षोढान्याससमहाभू
षां षोडशार्णस्वरूपिणीं ४१ इच्छाज्ञानक्रियानन्दचित् पंकजविलासिनीं
अपञ्चादिजगन्मूर्त्तिमंत्रदेवतमातृकां ४२ सप्तकोटिमहामंत्ररूपिणीं
चित्स्वरूपिणीं षडध्वद्योतनस्फूर्जद्विहारणसुपेशलां ४३ षड्विधैक्या
नुसंधानपरचिद्व्योम्नि संस्थितां षडम्बुरुहचक्रान्तस्फूर्जत्सौदामिनीप्र
भां ४४

मा

षड्वक्त्रगजवक्त्राभ्यां पार्श्वयोरुपशोभितां अणिमादिवृतामाद्यामणिम्याद्यष्टसिद्धि
दां ४५ सकृत्स्तवनमात्रेण विरिंच्यादिपदप्रदाम् कल्याणरूपसंपन्नां नतक
ल्याणदायिनीम् ४६ तां सर्वमंगलां देवीं सर्वमंगलविग्रहां अनेकजन्मसंसिद्ध
सुकृताराध्यपादुकाम् ४७ सर्वलोकैकजननीं सर्वलोकैकनायिकाम् सचा
मराभ्यां श्रीवाग्भ्यां पार्श्वयोरुपसेवितां ४८ मन्त्रिणीदण्डिनीनीतिविधानदश
पी नोत्सुकां कलाचीवीटिकाछत्रश्रृंगारादर्शपादुकां ४९ माणिवीणांशुकं शा
लीतालवृन्तं कमंडलुं पानपात्रं स्वर्णवेत्रं शर्णस्वर्णजटद्वयं जयकाहालि
काभेरीशंखवेद्वन्द्वविमर्दलाम् दिव्यानिरूपपात्राणि सदासौवर्णदीपिका ५१
बिभ्रतीभिश्च बालाभिः शर्णवानीलिभिर्वृतां गायत्री चैव सावित्री सिद्धल
क्ष्म्या सरस्वती ५२ वाग्वादिन्यानुकूलिन्या तुरगारूढयावृतां संपत्कार्या च
साम्राज्यालक्ष्म्या चक्रकुरुकुल्लया ५३ पद्मावत्या रेणुकया भद्रकाल्या च
दुर्गया नीलकंठ्या महाकाल्या भद्रकाल्या च भद्रया ५४ महामोद

४ रितामाद्यदेवतागणसेवितां गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीं ५५ पंच
शत्पीठमध्यस्थां पंचाशद्वर्णरूपिणीम् नवचक्रात्मिकां देवीं नवचक्रादिदेवतां ५६
नित्यानंदमयीं नित्यां नित्याषोडशकान्वितां अनंतैर्योगिवृंदैश्च अणिमाद्यै
र्महोज्वलैः कोटिकोटिप्रभिन्नैश्च कोटिबालार्कसन्निभैः ५८ चतुःसमय
देवीभिः षड्विधैर्योगिणीगणैः षडूर्म्यादिदेवैश्च पंचाम्नायादिदेवतैः ५९
चतुरायतनञ्ज्ञारिगणेशार्कहरीश्वरैः नवावरणदेवीभिर्नवधायोगिणी
गणैः ६० सेवितामरुणानीककोटिकोटयर्कपाटलाम् ब्रह्माणीकोटि
सहितैर्ब्रह्मकोटिभिरर्चितां ६१ नामपारायणपरैर्लक्ष्मीनारायणै
स्तुतां ज्वलन्मूर्तिभिरत्युग्रैः शतरुद्रियसूक्तिभिः ६२ रुद्राणीकोटि
सहितै रुद्रकोटिभिरावृतां अनेकशरभाघोरवडवानलभैरवैः ६३
दुर्गाभिः कालिकाभिश्च महाकालैश्च संवृतां गणपैर्वीरभद्रैश्च वटुकैः
क्षेत्रपालकैः ६४ सुकुमारैः कुमा

कै

री भिस्तथाह रिहरात्मजैः अनेककोटिदिक्पालचंद्रार्कवसुकोटि
भिः ९५ सनकाद्यैश्चयोगीन्द्रैः सप्तर्षीणांचकोटिभिः नारदादिसु
रर्षीणांकोटिभिःपरिसेविता ९६ अप्सरोयक्षगंधर्वकिन्नराणांच
कोटिभिः सनकादिमुनीनांचसविद्याधरकोटिभिः ९७ पंचप
त्ननिधीनांचकोटिभिःपरिसेविता भैरवीभैरवाणांचकोटि
कोट्यभिसंहता ९८ हरासुराणांकोटीनांनवभिःपरिसेविता
सर्वमंत्रमयीदेवीसच्चिदानंदरूपिणी ९९ इच्छाज्ञानक्रियारूपा
भिश्चाकलितविग्रहा पराद्विवेश्वरीरूपांमहामायांपरात्परां १०
महालक्ष्मीमहादेवीमहात्रिपुरसुन्दरी जगदाह्लादजननीजग
त्सकल्पविग्रहा १० जगत्सञ्जीवनोद्यक्तांजगद्रञ्जनकारिणी म

ड

श्रा. ५

ह्वाकामकलारूपाचन्द्राननसंस्तुता ७२ राजराजेश्वराङ्कस्थांरा
जराजेश्वरेश्वरी एवंध्यात्वापरांशक्तिंहृदयेचक्ररूपके ७३ पूर्वोक्त
न्यासमन्त्रज्ञात्मास्वात्मभावेनभावयेत् अन्तर्यागक्रमेणैवसिद्धद्रव्य
समन्विते: ७४ रक्ताम्बरस्रगालेपरक्तभूषणभूषितां लालारुण
गन्धैःक्षिप्त्वापूजांकुर्यात्समाहितः ७५ आवाहिन्यादिमेदेव्यदशमु
द्राःप्रदर्शयेत् यथाशक्तिजपेद्दिव्यांश्रीविद्यांसर्वसिद्धिदां ७६ सौभा
ग्यवर्धिनीमुद्रादिपुजिह्वाग्रयल्लिणी शक्तिसंचलनंकुर्यात्स्वेवे
ष्टनमाचरेत् ७७ पुनःसंपूर्णयावैवगलोर्ध्वंविन्यसेद्बुधः व्यापका
न्तेयोनिमुद्रांमुद्रांविदित्वाभिवन्दयेत् ७८ संपूर्णंचिंतयेद्विद्वान्ब्रह्म
रंध्रेरुणप्रभां द्रवत्सुधाषोडशार्णांसर्वसौभाग्यदायिनीम् ७९

ब्रह्मरंध्रे न्यसेत्पूर्वंमणिपूरे न्यसेत्ततः ललाटेनामिकां कृत्वा त्रैलोक्य
स्यत्यहप्रभुः ८० गुरूपदिष्टमार्गेण षोडशार्णं न्यसेत्ततः संहारं चत
थासृष्टिस्थितिन्याससमाचरेत् ८१ करशुद्ध्यादिन्यासपूर्वं च षडङ्गन्यास
माचरेत् क्रमपूजापरो मंत्री श्रीचक्रार्चनपूर्वकं ८२ बिंदु बिंदुत्रि
यात्रूर्ध्वहार्दयोनिस्वरूपकं महाकामकलारूपमात्मानं भावयेद्धिया
८३ संपूर्णं चिन्तयेद्विद्वान्ब्रह्मरंध्रेरुणप्रभां इवत्सुधाषोडशार्णं
न्सर्वसौभाग्यप्रदान्स्मरन् ८४ षोडशार्णं महामंत्रं मंत्रराजोत्तमोत्तमं
सकृच्छ्रवणमात्रेण कोटिजन्माघनाशनं ८५ महापातककोटी
नां भञ्जनं स्मृतिमात्रतः उपपातकदौर्भाग्यशमनं भुक्तिमुक्तिद
म् ८६ विषरोगादिदारिद्र्यमृत्युसंहारकारणं सप्तकोटिमहामंत्रपा

३
^ हृदिकापादुकासिद्धिखेचरत्वादिदायकं
^ ब्रह्मविष्णुमहेशाद्यैर्जप्तं तत्पदलब्धये ९०.

पा ८

6

गायणफलप्रदं ८७ चतुःसमुद्रपर्यन्तभूदानफलदं शिवे स
हस्रकोटिगोदानफलदं स्मृतिमात्रतः ८८ कोट्यश्वमेधफल
दं जरामृत्युनिवारणं किंपुनर्बहुनोक्तेन शिवसायुज्यदायकं ८९ ^
तद्रूपदेशिकाल्लब्धं षोडशार्णं महामनुं क्रमपूजापरो मंत्री श्री
चक्रार्चनपूर्वकं ९१ सहस्रं पूजयेद्विद्वांस्त्रिशतं शतमेव वा स
जीवन्मुक्त एव स्यात्सर्वसौभाग्यसुंदरः ९२ श्रीगुरोः पादुकामू
र्ध्नि श्रीचक्रं स्यादिदेवता श्रीविद्या यस्य जिह्वाग्रे स साक्षात्परमेश्व
रः ९३ सहस्रारसुधासिक्तषडंबुरुहजन्मनः श्रीचक्रदेवी श्रीना
दःस्वात्मानमैक्यमासदन् ९४ त्रैलोक्यमरुणं ध्यात्वा श्रीविद्यां यो
जपेत्सुधीः स योगी कृतकृत्यश्च चराचरगुरुर्भवेत् ९५ सिद्धा

रणगंधर्वयक्षरक्षोगणैःस्तुतः समस्तभूतप्रेतादिकृत्याकृत्य
विभंजनः ५६ जंगमस्थावरोद्योतविषनिद्रावणकोविदः दि
व्यमङ्गलकल्याणगुणरत्नैरलंकृतः ५७ मृतसंजीवकोनि
त्यमहाभूतचरित्रभूः विचरत्यखिलांल्लोकान्निग्रहानुग्रहेल
मः ५८ महालक्ष्मीमयोभूत्वालक्ष्मीहन्देवैस्सेवितः भुंजानोब
हूलान्भोगान्मूर्तिमानिवमन्मथः ५९ सृष्टिस्थित्युपसंहार
कर्ताशिवइवापरः राजराजेश्वरीरूपोराजराजादिवन्दितः
कुलकोटिसमायुक्तोशिवयोरैक्यमाप्नुयात् ६० इतिश्रीराज
राजेश्वरीतंत्रेदिव्यमंगलध्याननामाष्टात्रिंशत्पटलः ३८ शुभं